तथाचरणं प्रतिपत्तिरूपकर्माङ्ग एव प्रतिपाद्याभावे तन्निवृत्तिः पशुयागे "लोहितं निरस्यति सक्तून्निरस्यति" इत्यादावुक्ता । अतएव यज्ञवास्तुरूपप्रतिपत्तियागेऽपि यज्ञो यत्र वसति इति यज्ञवास्तुसमाख्यानुरोधेनास्तृतकुशविनाशेऽपि कुशान्तरप्रतिनिधिर्भट्टनारायणैर्गोभिलभाष्ये उक्तः "प्राक् स्विष्टिकृत आवापः" इति गोभिलसूत्रस्य व्याख्यानेऽपि आवप्यते इत्यावापः प्रधानहोमः स तु स्विष्टिकृद्धोमात् प्राक् न पश्चादित्यर्थः । एवञ्च मुख्यहोमे त्वकृते यदि चरुर्नष्टो दुष्टो वा भवति तदान्यः पाच्यः मुख्ये कृते चेन्नाशदुष्टौ तदाज्येनैव स्विष्टिकृद्धोम इति सरला । एतेन शेषनाशे पिण्डनिवृत्तिरिति वाचस्पतिमिश्रोक्तं हेयम् । एतेनार्घ्यदानविधानेन पिण्डमिश्रणप्रकारो व्याख्यात उक्तः" ।

"पितरि पूर्वं मृते तद्वर्षाभ्यन्तरे पितामहे प्रपितामहे मृते यथा कर्त्तव्यं तथाह छन्दोगपरिशिष्टे कात्यायनः "पितुः सपिण्डतां कृत्वा कुर्य्यान्मासानुमासिकम् । असंस्कृतेन संस्कार्य्यौ पूर्व्वौ पौत्रप्रपौत्रकैः । पितरं तत्र संस्कुर्य्यादिति कात्यायनोऽब्रवीत् । पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वा । पितामहेन पितरं कुर्य्यादिति विनिश्चयः" । पितुः सपिण्डतां कृत्वा प्रेतीभूतयोरपि पितामहप्रपितामहयोः सम्बन्धे प्रतिमासविहितं पार्व्वणं पितृवृद्धप्रपितामहातिवृद्धप्रपितामहानां कर्त्तव्यं न तु तयोः सपिण्डीकरणापेक्षा कार्य्या ननु सपिण्डनेनासंस्कृताभ्यां सह पिण्डैः कथं सपिण्डनाख्यसंस्कारस्तस्मात्तदर्थं तयोः सपिण्डीकरणमपकर्षणीयं पितुरेव वा सपिण्डनमुत्कर्षणीयमित्यत आह असंस्कृतेनेति । उत्कर्षापकर्षौ न कार्य्याविति अनेन वचनेनोक्तं कथमसंस्कृतेन सह संस्कार इत्यत्राह पापिष्ठमपीति पापिष्ठमकृतसपिण्डीकरणं शुद्धेन कृतसपिण्डीकरणेन पितामहेन पापकृता अकृतसपिण्डीकरणेनापि शुद्धं कुर्य्यादिति शास्त्रनिश्चयः । अतो वचनबलाददोष इति तात्पर्य्यम् । अत्र तु प्रेतीभूतपितामहेन पितुः सपिण्डने पितामहैकोद्दिष्टमेव । "असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत्" इति प्रागुक्तजाबालवचनात् । एवमन्यत्रापि बोध्यं वृद्धप्रपितामहस्य प्रेतत्वे तेन सह न कार्य्यमिति तात्पर्य्यम् । अत्र मातुः सपिण्डने श्वशुराद्यश्वशुरयोः पिण्डौ कुर्य्यादाद्यौ । तथा च गार्ग्यः "पतिनैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियाः । सा मृता हि मृतैकत्वं कुर्य्यादत्यायन् पितॄन् । श्वशुरस्वामिनौ यस्माच्छिरःप्रच्छादनक्रिया । पुत्रैर्दर्भेण सा कार्य्या मातुरभ्युदयार्थिभिः" । अन्तरयन्तीत्यर्थे अन्तरयन्निति लिङ्गव्यत्ययेन पुंस्त्वमिति हलायुधः । परञ्चैतं गोभिलश्राद्धसूत्रभाष्यकृतापि लिखितम् । अतएव प्रव्रजिते पतिते वा पितरि मृतेऽपि न पितामहादिभिर्मातुः सपिण्डीकरणं किन्तु पितामह्यादिभिरेव । "स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः । एकत्वं सा गता यस्माच्चरुमन्त्राहुतिव्रतैः । तस्मिन् सति सुताः कुर्य्युः पितामह्या सहैव तु" । इत्यत्र तस्मिन् सतीति श्राद्धानर्हभर्त्तुरुपलक्षणम् । अतएव "तस्याश्चैव तु जीवन्त्यां तस्याः श्वश्र्वेति निश्चयः" इति लघुहारीतेन श्वश्रूजीवने तस्याः श्वश्र्वोक्तं न तु श्वशुरेणेति क्वचिदप्युक्तम् । एवं पितामह्यादिभिर्मातुः सपिण्डीकरणेऽपि सामगैः "ये चात्र त्वामनुयांश्च त्वमनु तस्मै ते स्वधा" इति मन्त्रो न पाठ्यः मन्त्रलिङ्गविरोधात् अतएव आभ्युदयिके मातृपक्षे श्रीदत्तादिभिर्मन्त्रान्तरं लिखितं न तु ये चात्र त्वामिति वस्तुतस्तु आभ्युदयिके छन्दोगानां मातृपक्ष एव नास्तीति वक्ष्यते" ।

लघुहारीतः "सपिण्डीकरणान्तानि यानि श्राद्धानि षोड़श । पृथङ्नैव सुताः कुर्य्युः पृथग्द्रव्या अपि क्वचित् । प्रेतसंस्कारकर्म्माणि यानि श्राद्धानि षोड़श । यथाकालन्तु कार्य्याणि नान्यथा मुच्यते ततः" । पृथग्द्रव्या अपि विभक्तधना अपि पृथक् न कुर्य्युः सुतरामपृथग्धनाः पृथक् न कुर्य्युः किन्त्वपृथक् कुर्य्युः अत्र विशेषयति मरीचिः । "मृते पितरि पुत्रेण क्रिया कार्य्या विधानतः । बहवः स्युर्यदा पुत्राः पितुरेकत्रवासिनः । सर्व्वेषान्तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम् । द्रव्येण चाविभक्तेन सर्व्वैरेव कृतं भवेत्" । पुत्रेणेत्यविशेषात् सर्व्वेषामधिकारे प्राप्ते ज्येष्ठस्य साक्षात् कर्त्तृतामाह बहव इति । ज्येष्ठेनापि सर्व्वेषां भ्रातृणां मतकरणेनैव करणं भवतु इति मतं ज्ञानं कृत्वा विभक्तत्वे द्रव्यसंश्लेषेण च कृतं कर्म्म सर्व्वैरेव कृतमेव भवेत् । तदानीं द्रव्यासंश्लेषेण च तस्मात् द्रव्यं प्राप्तव्यमिति कृत्वा कर्त्तव्यम् । यदि तेन तन्न परिशुध्यते तदा स ऋणी भवति प्रत्यवायी च भवतीति । न तु तेन श्राद्धान्तरं कर्त्तव्यमिति श्राद्धविवेकोक्तं युक्तम् । "पृथङ्नैव सुताः कुर्य्युरित्यनेन पृथक्करणस्य पर्य्युदस्तत्वेनानधिकारात् । यथाकालमिति अशौचान्तद्वितीयदिनद्वादशमासमृतति-